## नेड् वशि कृति । (८/२९८१)

वशादौ कृति प्रत्यये परतः इडागमो न भवति[1] । वरमनादौ [2]प्रयोजनम् । ईशिता । ईशितुम् । ईश्वरः । दीपिता । दीपितुम् । दीप्रः । भसिता । भसितुम् । भस्म । याचिता । याचितुम् । याच्ञा । वरमनादौ इत्युदाहरणप्रदर्शनार्थम्, न परिगणनम् । तेन 'अमन्ताड्डः' (उ. ११९) इत्येवमादावपि हि प्रतिषेधो भवति । अथ तत्र 'उणादयो बहुलम्' (३.३.१/३१६९) इति समाधीयते ? सम्भवोदाहरणप्रदर्शनमेतत् । कृति इति किम् ? [3]रुदिवः । रुदिमः ॥

## तितुत्रतथसिसुसरकसेषु च । (९/३१६३)

ति तु त्र त थ सि सु सर क स इत्येतेषु कृत्सु इडागमो न भवति । ति इति क्तिन्क्तिचोः [4]सामान्यग्रहणम् । [5]क्तिच् – तनिता । तनितुम् । तन्तिः । [6]क्तिन् – दीपिता । दीपितुम् । दीप्तिः । तु – 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्' (उ. ७२) । सचिता । सचितुम् । सक्तुः । त्र – दाम्नीशसयुयुज (३.३.१८२/३१६२) इति ष्ट्रन् । पतिता । पतितुम् । पत्रम् [7]वाहनम् । उणादिष्वपि 'सर्वधातुभ्यः ष्ट्रन्' (उ. ६०८) । तनिता । तनितुम् । तन्त्रम् । त – 'हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्' (उ. ३७३) । हसिता । हसितुम् । हस्तः । लविता । लवितुम् । लोतः । पविता । पवितुम् । पोतः । धूर्विता । धूर्वितुम् । धूर्तः । औणादिकस्यैव तशब्दस्य ग्रहणमिष्यते, न पुनः क्तस्य, हसितम् इत्येव हि तत्र भवति । थ – 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ. १६७)। कोषिता । कोषितुम् । कुष्ठम् । काशिता । काशितुम् । काष्ठम् । सि – 'प्लुषिशुषिकुषिभ्यः क्सिः' (उ. ४४३) । कोषिता । कोषितुम् । कुक्षिः । [8]सुक् च इषेः (उ. ४४५) । एषिता । एषितुम् । इक्षुः । [9]अशेः क्सरन् (उ. ३५७) । अशिता । अशितुम् । अक्षरम् । क – 'इणभीकापाशल्यतिमर्चिभ्यः कन्' (उ. ३३०) । शलिता । शलितुम् । शल्कः । स – 'वृतुवदिहनिकमिकषिभ्यः सः' (उ. ३४९) । वदिता । वदितुम् । वत्सः ।

[८३१] तितुत्रतथेष्वग्रहादीनामिति वक्तव्यम् । (म. भा. ३.२८३)

ग्रहादयो ग्रहप्रकाराः, [10]येषामिट् क्तिनि दृश्यते । निगृहीतिः । उपस्निहितिः । निकुचितिः । निपठितिः । कृति इत्येव, रोदिति । स्वपिति ॥

## एकाच उपदेशेऽनुदात्तात् । (१०/२२४६)

उपदेशे य एकाच् धातुरनुदात्तश्च तस्मा[11]दिडागमो न भवति । प्रकृत्याश्रयोऽयं प्रतिषेधः । के पुनरुपदेशेऽनुदात्ताः ? ये तथा गणे पठ्यन्ते, त एव विस्पष्टार्थमनिट्कारिकासु प्रविभक्ताः प्रदर्श्यन्ते ।

---

1. आर्धधातुकस्य इड्वलादेः इति वक्ष्यति तस्य पुरस्तात् प्रतिषेधोऽयमारभ्यते इत्यधिकम् ह. इ. 2. कृति इत्यधिकम् ह. 3. रुरुदिव रुरुदिम ब. क. ड. ह. 4. सामान्येन ग्रहणम् क. इ. 5. नास्ति क. 6. नास्ति क. 7. नास्ति क. ई. 8. इषेः क्सुः क. 9. असेः सर क. 10. तेषाम् क. 11. उत्तरस्य वलादेरार्धधातुकस्य इत्यधिकम् क. ब.